CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

SDPYB

Coll. No. 789

Title Udyāpana-vidhi

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No. : 789 Subject : Puranic Rit

Title : Udyāpanavidhi

Author : – Scribe : –

Date of the work : – Date of the Ms. : –

Place of the work : – Place of the Ms. : –

Size : 6.5" by 3.7" Extent : 10 foll.

Language : Sanskrit Script : Devanagari

Remarks : ——

श्रीपुरुषोत्तमायनमः ॥ अथसम्यग्वदब्रह्मन्नुद्यापन
विधिंमुने ॥ पुरुषोत्तममासीयव्रतीनांकृपयान्वणी ॥ १ ॥
समासतःप्रवक्ष्यामिमासेश्रीपुरुषोत्तमे ॥ उद्यापनवि
धिंसम्यक्व्रतसंपूर्णहेतवे ॥ २ ॥ कृष्णपक्षे चतुर्द
श्यांनवम्यांपुरुषोत्तमे ॥ अष्टम्यांवाथकर्तव्यंउद्या
पनमुदीरितं ॥ ३ ॥ यथालब्धोपहारेणमासेस्मिन्

पुरुषोत्तमे॥पुण्येह्निप्रातरुत्थायकृत्वापूर्वाह्निकाःक्रि
याः॥४॥समाहितमनाभूत्वात्रिंशद्विप्रान्निमंत्रयेत्॥स
पत्निकान्सदाचारान्विष्णुभक्तिपरायणान्॥५॥
यथाशक्त्याधिवासश्चपंचवित्तानुसारतः॥ततोम
ध्याह्नसमयेद्रोणमानेननृपते॥६॥तदर्द्धेनतदर्द्ध १
नवित्तशक्त्यानुसारतः॥पंचधान्येनकुर्वीतसर्व

तोभद्रमुत्तमं॥७॥चत्वारःकलशाःस्थाप्याहेमावा
राजताश्शुभाः॥ताम्रावामृन्मयाशुद्धाअव्रणामंड
लोपरि॥८॥चतुर्दिक्षुचतुर्व्यूहप्रीतयेश्रीफलांन्
विताः॥सद्वस्त्रवेष्टितानागवल्लीदलसमन्विताः
॥९॥वासुदेवंहलधरंप्रद्युम्नंदेवमुत्तमं॥अनिरुद्धं
चतुर्थंचस्थापयेत्कलशेषुच॥१०॥पुरुषोत्तमव्रता

रंभे स्थापितौ पुरुषोत्तमौ ॥ सराधौ देवदेवेशौ कलशेन
समन्वितौ ॥ ११ ॥ ततश्चानायतनमध्ये मंडलोपरि विन्य
सेत् ॥ आचार्यं वैष्णवं कृत्वा वेदवेदांगपारगं ॥ १२ ॥
विप्राश्चत्वार एवात्र वरणीया च पार्थिव ॥ देवे वस्त्रे
च दातव्ये हस्तमुद्रादि संयुते ॥ १३ ॥ आचार्यं समलं २
कृत्य वस्त्रभूषादि निर्मुदा ॥ ततो देवविष्णुं ध्यायं

प्रायश्चित्तं समाचरेत् ॥ ततः पूर्वोक्तविधिना पूजा
कार्या सहस्त्रिया ॥ २१ ॥ चतुर्व्यूहजपः कार्यो चत्वैर्विप्रै
श्चतुर्विधैः ॥ २२ ॥ चतुर्दिक्षु प्रकर्तव्या दिपाश्चत्वा
रउद्धृताः ॥ अर्घदानं ततः कार्यं नालिकेरादिभिः
क्रमात् ॥ २३ ॥ पंचरत्नसमायुक्तैर्जानुभ्यां सक्तं
नरः ॥ स्वपाणिपुटमध्यस्थैर्यथावत्फलैः शुभैः

श्रद्धाभक्तिसमायुक्तः सपत्निकोमुदान्वितः ॥ अर्घंद
द्यात्प्रयत्नेनमनसाश्रीहरीस्मरन् ॥१८॥ अर्घमं
त्रः ॥ देवदेवनमस्तुभ्यंपुराणपुरुषोत्तम ॥ गृहाणा
र्घंमयादत्तंराधयासहितोहरे ॥१९॥ वंदेनवघन
श्यामंद्विभुजंमुरलीधरं ॥ पीतांबरधरंदेवंसा ३
राधंपुरुषोत्तमं ॥२०॥ एवंनत्वाहरींभक्त्यासराध

पुरुषोत्तमं ॥ चतुर्थ्यंनाममंत्रैस्तुतिलहोमंचकारये
त् ॥२१॥ ततस्तदंतेतन्मंत्रैःकार्यंतर्पणमार्जने ॥ नि
राजयेत्ततोदेवंसराधंपुरुषोत्तमं ॥२२॥ नीराजया
मिदेवेशमिंदीवरदलच्छविं ॥ राधिकारमणंप्रेमणा
कोटिकंदर्पसुंदरं ॥२३॥ अथध्यानं ॥ अंतर्ज्योतिरनं
तरत्नरचितेसिंहासनेसंस्थितंवंशीनादविमो

हितत्रब्रजवधुर्वृंदावने सुंदरं॥ ध्यायेद्राधिकयासु
कौस्तुभमणिप्रद्योतितोरस्थलं राजद्रत्नकिरीट
कुंडलधरंप्रत्यग्रपीतांबरं॥२॥ श्रीवत्सवक्षसं शां
तंनीलोत्पलदलछविं॥ त्रिभंगललितं ध्यात्वै
यैसराधं पुरुषोत्तमं॥३॥ ततः पुष्पांजलिंदत्वारा ७
धिकासहितेहरौ॥ नमस्कारंप्रकुर्वितसाष्टांग

ण्टदक्षिणयुतः॥ नौमिनवघनश्यामंपीतवाससमुच्यु
तं॥ श्रीवत्सभाषितोरस्कं राधिकासहितंहरिं॥
पूर्णपात्रंततोदद्यात्ब्राह्मणेसहिरण्यकं॥ आ
चार्यायततोदद्याद्दक्षिणांविपुलांमुदा॥ आचार्यं
तोषयेद्वस्त्रयावस्त्रैराभरणैरपि॥ सपत्नीकंततोदद्या कं
त्रऋत्विग्भ्योदक्षिणांपरां॥ धेनुरेकाप्रदातव्यासुशीला

चपयस्विनी॥ सचैलांचसवत्सांचघंटाभरणभूषितां
ताम्रपृष्ठिंहेमश्रृंगींसद्रौप्यखुरभूषितां॥ घृतपात्रं
ततोदद्यात्तिलपात्रंतथैवच॥ उमामाहेश्वरंदद्याद्द्व
योःपरिधानकं॥ पद्ममष्टविधंदद्यादुपानद्युगलंत
था॥ श्रीमद्भागवतंदद्याद्धेमवायद्विजन्मने॥ शक्ति ५
श्चेन्नविलंबेतचउमायुर्विचारयेत॥ श्रीमद्भाग

वतंसाक्षाद्भगवद्रूपमद्भुतं॥ योदद्याद्धेमवायेवपंडि
तायद्विजन्मने॥ सकोटिकुलमुद्धृत्यह्यप्सरोगण
सेवितः॥ विमानमधिरुह्येतिगोलोकंयोगिदुर्ल
भं॥ कन्यादानसहस्राणिवाजपेयशतानिच॥
सधान्यह्येनुदानानितुलादानानियानिच॥ महा
दानानियान्यष्टौछंदोदानानियानि॥ श्रीमद्भाग प

वतदानस्यकलां नार्हंतिषोडशीं॥तस्माद्यत्नेनतद्देयं
वैस्नवायद्विजन्मने॥सौरूप्यहेमन्नपादिहेमसिंहास
नेस्थितं॥कांस्यानिसंपुटान्येवं त्रिंशद्देयानिस
र्वथा॥त्रिंशत्रिंशदपूपैश्चमध्येसंपूरितानिच॥
प्रत्यपुपंतुयावंतोछिद्राणिपृथवितले॥तावद्वर्ष ६
सहस्राणिवैकुंठंवसतेनरः॥ततःप्रयातिगोलो

कंनिर्गुणीयोगीदुर्ध्वर्नं॥यद्गत्वाननिवर्त्तंतेऽयोति
द्धर्मसनातनं॥साद्धप्रस्तद्वयंकांस्यसंपुटपरिकी
र्त्तितं॥निःछिद्रेनयथाशात्त्याकार्याणिव्रतपूर्त्तये
श्चैवापेपूपसामग्रीमपक्कीशाकलीपरी॥तत्राद्या
यप्रदेयानिपुरुषोत्तमप्रीतये॥निमंत्रितानीवि
प्राणीसपत्नीकानीनराधिप॥संकल्पीचप्रकुर्वी

त्पुरुषोत्तमसंन्निधौ ॥ श्रीकृष्णजगदाधारजगदा
नंदकौदायक ॥ ऐहिकामुष्मिकान्कामान्निरिव
ञान्पुरयाश्रुमे ॥ इतिसंप्रार्थ्यगोविंदं भोजयेद्ब्रा
ह्मणान्मुदा ॥ सपत्नीकान्सदाचारान्संस्मर
न्पुरुषोत्तमं ॥ संपूज्यविधिवद्भक्त्या भोजयेद्धृ ७
तपायसैः ॥ विप्ररूपंहरिंस्मृत्वा स्त्रीरूपींराधि

कांस्मरन् ॥ भोजनस्यतुसंकल्पमाचरेद्विधि
नावनी ॥ द्राक्षाभिः कदलीभिश्चचूतैश्चविविधै
रपि ॥ घृतपाचितपक्वान्नैः शुभैश्चमाषकेवटैः ॥
शर्करायाघृतपूपैश्चपूरितैः खंडमंडकैः ॥ उर्वारु
कर्कटीशाकैराद्रकैर्लिंबुकैस्तथा ॥ अन्यैश्चवि
विधैः शाकैः राज्ञैः पक्वैः पृथक्पृथक ॥ चतुर्द्धा
भाजनैरेवषड्रसैः सहसंगतैः ॥ वासितान्गोरसौ

स्तत्रपरिवेश्यमृदुब्रुवन्॥इदंस्वादुमुदाभोज्यंभव
दर्थंप्रकल्पितं॥याच्यतांरोचतेब्रह्मन्नयमयापाचि
तंप्रभो॥धन्योस्म्यनुगृहीतोस्मिजातंमेजन्मसा
र्थकं॥भोजयित्वामुदाविप्रान्देवांस्तांबूलदक्षि
णां॥एलालवंगकर्पूरपूगजावित्रीजातिकं॥ ८
कस्तूरीमुरमांसीचचूर्णंचखदिरंशुभं॥एतैश्च
मिलितैर्देवतांबूलंभगवत्प्रियं॥तस्माद्देवंवि

धंदेवंतांबूलंभक्तिसंयुतं॥तांबूलंयोद्विजाग्याय
एवंभक्त्याप्रयच्छति॥सुभगश्चभवेदत्रपरत्रामृ
तभुग्भवेत्॥परितोषसपत्नीकान्हस्तेदद्याश्चच
मोदकान्॥पत्नीभ्योवैणवींदद्याद्भक्त्याविधान
तः॥आसीमांतमनुव्रज्यब्राह्मणांस्तान्विसर्जयेत्
मंत्रहीनेतिमंत्रेणक्षमापयेत्पुरुषोत्तमं॥यस्यस्मृ
त्येतिमंत्रेणनमस्कृत्यजनार्दनं॥यत्कृतंतच्चसीपर्णंवि

ध्यायविचरेत्सुखी॥ अन्तीविनज्यन्ततेभ्योयथागम
कुसयन्॥ भुंजीतःस्वजनैःसार्द्धंमिथ्यावादविवर्जितः
द्वितीयदिवसेप्राप्तेकुर्यात्पारणंनिशि॥ राधिका
सहितंहैमंपूजयेत्पुरुषोत्तमं॥ पूजांतेचनमस्कृत्यस
पत्नीकोमुदान्वितः॥ इतीविसर्जयेद्देवंसराधंपुरु ९
षोत्तमं॥ आचार्यायततोदद्यादुपहारंसमृत्तिकं॥ अ
न्नदानंयथायोग्यंदद्यादिच्छानुसारतः॥ वेनकेनाप्युपायेन

व्रतमेतत्समाचरेत्॥ कुर्याच्चपरयाभक्त्याद्यानैवित्तानुसारतः॥
नारीवाथनरोवापिमासमेकंव्रतंचरेत्॥ दुःखदारिद्र्यदौर्भा
ग्यंनाप्नुयात्जन्मजन्मनि॥ येकुर्वंतिजनालोकेनानापूरणम
नोरथाः॥ विमानान्यधिरुह्यैवयांतिवैकुंठमुत्तमं॥ ६५॥ १०
इतिश्रीबृहन्नार०पुरुषो०दृढधन्वो०उद्यापनविधि
कं०ना०पंचविंशोध्यायः॥२५॥